उदात्तश्चानुदात्तश्च स्वरितः प्रचयस्तथा ।
कादीनां पञ्चवर्गाश्च स्पर्शा इति हि संज्ञिताः ॥
दुस्पृष्टश्चेति विज्ञेयो डढयोः स्वरमध्ययोः ।
वर्गाणां प्रथमा वर्णा द्वितीया ऊष्मसंज्ञिताः ॥
विकारवर्जाश्चाघोषाश्शिष्टं घोषवदुच्यते ।
नासिक्याः पञ्चमा वर्णा अनुस्वारस्तथैव च ॥

Ends :

त्रिस्थानं च त्रिमात्रं च त्रिब्रह्म त्र्यक्षरं . . ।
त्रिमात्रादर्द्धमात्रात्तु यस्तं वेद स वेदवित् ॥
वेदो हि वर्ण्णसंघातो वेदो ब्रह्मेति कीर्त्यते ।
तस्मात्तद्वेद वर्ण्णज्ञो ब्रह्मलोके महीयते ॥
एतत्पुण्यं पापहरं वाङ्मनस्य विशोधनं ।
भक्त्या ज्ञात्वा च संगृह्य ब्रह्मलोकं स गच्छति ॥
अनेन विधिना वेदं योधीते श्रद्धयान्वितः ।
सर्व्वपापैर्व्विमुक्तस्स ब्रह्मलोके महीयते ॥

ओ ओ इति शौनकीयशिक्षा समाप्ता । ओ ओ करकृतमपराधं क्षंतुमर्हन्ति सन्तः ॥ शुभमस्तु ।

1028. 21. Q. 10.

THE S'AUNAKĪYAS'IKṢĀVYĀKHYĀ—ANONYMOUS

शौनकीयशिक्षाव्याख्या—अज्ञातकर्तृका

Palm-leaf. 68 folia (48 sq.). 6″ × 1″. 4—6 lines in a page. Malayāḷam script. Wooden board at either end. Old. In good condition. Beautiful medium writing. Inked.

Complete.

Author not mentioned.

Begins: हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।
सृष्ट्वाग्रे वियदादितैस्सुरनृगोपक्ष्यादिकान् स्थावरान्
पाद्यात्र च संप्रविश्य विविधन्नामानि रूपाणि च ।
व्याकृत्य स्थित एष कर्म निखिलं कुर्वन्निवालक्ष्यते
यस्तन्नौमि विभुश्चिदात्मकमजं वेदान्तवेद्यं शिवं ॥
या शौनककृता शिक्षा वर्णोच्चारणबोधिनी ।
अविस्मृत्यै स्फुटहस्तस्या श्रोतोर्थौ लिख्यते मया ॥

इह खलु भगवान् शौनक ऋग्वेदवर्णोच्चारणप्रतिपादकं शिक्षाख्यं ग्रन्थश्चिकीर्षुस्तस्याविघ्नपरिसमाप्त्यादिसिद्ध्यै स्वाभीष्टदेवतानमस्कारपूर्वकं श्रोतृबुद्धिसमाधानाय चिकीर्षितं प्रतिजानीते—सर्वज्ञमिति । अहं शिवं प्रणम्य ऋक्षु वर्णोच्चारणलक्षणं वक्ष्यामीत्यन्वयः । शिवशब्देनात्राशेषमंगलभूतमखिलकारणमानन्दरूपं परं ब्रह्माभिधीयते । देवताविषयमन्तःकरणप्रह्वीभावः प्रणामः । भक्तिपुरस्सरं शिवे मनस्समाधायेत्यर्थः । अपरिज्ञातस्वरूपे मनस्समाधानस्याशक्यत्वात्तस्य स्वरूपं कथयति सर्वज्ञमित्यादिविशेषणचतुष्टयेन । सर्वस्य शब्दार्थप्रपञ्चस्य स्वरूपभूतत्वात् सदा ज्ञाता सर्व्वज्ञः यस्सर्वज्ञः सर्वविदिति हि श्रुतिः । सर्वकर्त्तारं सर्वस्य स्थावरजंगमात्मकस्य प्रपञ्चस्य कर्त्तारं स्रष्टारं । उपलक्षणं चैतत् । स्थितिसंहारयोः काकाशादिप्रपञ्चस्य सृष्टिस्थितिसंहारकर्तारमित्यर्थः । तथा च श्रुतिः—यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तत् ब्रह्मेति । तथा सर्व्वात्मानमस्मिन् ब्रह्मादिस्तंबपर्यन्ते शरीरे जीवरूपेणावस्थितं सर्वो ह्येषामिति मन्त्राः । तथा गुरुं विद्यानामादिवक्तारं यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मा इति मन्त्रः । अथ वा गुरुं अन्धकारनिरोधकं । यथाहुः—

गुरुशब्दस्त्वन्धकाराख्यो रुशब्दस्तन्निरोधकः ।
अन्धकारनिरोधात्तु गुरुरित्यभिधीयते ॥

स्वभक्ताज्ञाननाशकमित्यर्थः । अथ वा एवंभूतं शिवमात्मनो गुरुं च प्रणम्येत्यर्थः । ऋक्छन्दो पादव्यस्थायुक्तमन्त्रवाचिना तत् बहुलो ब्राह्मणनिगदनिवित्प्रैषकन्तावादियुतसमाम्नायो गृह्यते । बहुवचनेन ऋक्भेदो विवक्षितः । शाकलकबाष्कल्ळकादिशाखाशाखाभेदभिन्ने मन्त्रब्राह्मणरूप ऋग्वेदे इत्यर्थः । प्रवक्ष्यामि स्पष्टं ब्रवीमीति । वर्णोच्चारणलक्षणं वर्णास्तावदाकारादयस्त्रिषष्टिः । त्रिषष्टिः चतुष्षष्टिर्वा । तेषामुच्चारणं प्रयोगः । तस्य लक्षणमसाधारणो धर्म्मः वर्णानां सामान्येन विशेषेण च प्रयोगकाले ये धर्मास्ताः ।

यथा व्याघ्री हरेत् पुत्रान्दंष्ट्राभिर्न च पीडयेत् ।
एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च पीडिता ॥

इति शिक्षान्तरे पीडितत्वं व्यक्तता च सामान्येन वर्णधर्म्मः । ओ औ उवर्ण इत्येषामित्यादिषु सकृदोष्ठत्वं द्विरोष्ठत्वमित्यादिविशेषधर्म्मः । ननु सर्ववेदसाधारणं शिक्षाख्यमंगं तत् कथमृक्षु वर्णोच्चारणलक्षणं प्रवक्ष्यामीति ॥

Ends:

अपरे मकारादित्येव । संम्राट् संराजभिरित्यत्र न भवति । एतदेव ज्ञापकं भवति । पदान्तीयानां स्पर्शानां यरवोष्मस्य परेषु विकृतौ सत्यान्न शाकलादिनिधानमित्यस्य । असंयुक्तं शाकलन्तं यच्छाकलमभिधानमुक्तं लकार ऊष्मस्यपि शाक हे गीः ॥

स्वशाखासंश्रितानां या तत्पवल्लीव कांक्षितं ।
ददाति द्विजमुख्यानां सेयमृश्रेयसेस्तु वः ॥

1029. 25. L. 35.

THE ṢAḌVIṂŚATISŪTRA—ANONYMOUS

षड्विंशतिसूत्रम्—अज्ञातकर्तृकम्

Palm-leaf. 5 folia (18 sq.). 12″ × 1½″. 9 lines in a page. Grantha script. Old. Worm-eaten. Good medium writing. Inked.

Imperfect, breaking off with देवा वा आग्रयणाग्रानैंद्रवायवाग्रांन वै प्रजवमृक्षा वै संवत्सर....॥

1030. 19. D. 61.

THE SAPTALAKṢANA

सप्तलक्षणम्

Palm-leaf. *22* folia (19 sq.). 15″×1$\frac{8}{10}$″. 8 or 9 lines in a page. Grantha script. Old. Slightly worm-eaten. Closely spaced bad large writing. Inked.

Pertains to the Yajurveda.

The Saṃhitāsamāna (foll. 1—3*b*), Nārāyaṇa's Vilaṅghya (foll. 3*b*—8*a*), S'aurisūnu's Nataparalakṣaṇa (foll. 8*a*—11*a*), the Avarṇi (foll. 11*b*—14*a*), the Āvarṇi (foll. 14*a*—15*b*), the Aniṅgya of S'rīvatsāṅka (foll. 15*b*—22*a*); all complete.

The title Vilaṅghya is here spelt as Viliṅghya. The Aniṅgya consists of 100 verses including the verse mentioning the author.

1031. 20. F. 40.

Palm-leaf (S'rītāla). 24 folia. 9$\frac{8}{10}$″×1$\frac{8}{10}$″. 8—10 lines in a page. Grantha script. Old. Injured. Fairly well written in a medium hand. Uninked.

The S'amāna (spelt here as Samāna) ends fol. 3*b*, the Vilaṅghya of Nārāyaṇa fol. 7*b*, the Naparatapara of S'aurisūnu fol. 9*b*, the Avarṇi fol. 13*b*, the Āvarṇi fol. 15*a* (the verse line attributing this work to Mahādhipatiyajvan of the Tintriṇī family is not found here), and the Aniṅgya of S'rīvatsāṅka (100 verses) fol. 24*a*.

On an extra leaf at the end :

नकारांतं पदं पूर्वमंतस्थासूत्तरं यदि ।
नकारांतस्थयोर्म्मध्ये तत्र वर्णमसंयुतं ॥
रेफपूर्वो नकारो यः पदांतो यत्र दृश्यते ।
विशेषं तत्र जानीयाद्वित्वमित्य . धीयते ॥
संयुक्तौ नवकारोश्च चेत् ऋकारः परतो यदि ।
संयुक्तं तत्र विज्ञेयं नोभयोर्व्यक्तिरिष्यते ॥
अंतस्थाद्युदये पूर्वः पञ्चमस्तु द्विरुच्यते ।
इतरादौ पदे तत्र स न चेति स्मृतो बुधैः ॥
मकारांतपदं पूर्वं ज्ञातिघ्नंमुत्तरे यदि ।
मकारोनुस्वार तिष्ठेत्तत्रानुस्वार एव हि ॥
ऐत्वा चष्यवचो वचोर्द्धश्च अयि मद्ध्ये य एकता
अहा भवंति सा व्यूर्द्धं न प्रत्यं पृष्ठय आदिता ॥
सख्या श्रेष्ठः परे स स्यात् इद्धयसेम्ने त्वमेव सा ।
योसौ चतुर्थः स सर्वेषां यद्यय: समर्द्धयति ॥

1032. 25. A. 66.

Palm-leaf. 25 folia. 14½″×1″. 2—5 lines in a page. Grantha script. Old. So heavily damaged as to be useless. Fairly well written in a medium hand. Uninked.

The S'amāna ends fol. 4*a*, the Vilaṅghya fol. 8*a*, the Napara fol. 9*b*, the Tapara fol. 10*b*, the Pragrahādhyāya fol. 13*b*, the Āvarṇi 20*b*, the Avarṇi fol. 25*a*.

The Pragrahādhyāya of which the author is not mentioned, begins : . . . . दे ह्रस्वं व्यञ्जनंपरः । देवाशीका . . म्नाखर्त्ता वयुना ह्रदया घोत्था . . . . चित्रावापरः । प्रस्थेंद्रिया द्रविणो विश्वदेव्या दीर्घाविया विश्वा पाता त्व भंगुरा . . . . . . गोपक् सामाद्या सत्रा वर्षा पुष्पा मेघा प्रास्वा लोक एवेष्टा ॥

Ends:

. . . . अनुदात्तेन नित्यं । ए . . . .
. . . . योः ।
स्यामाय . . . . स्वत . . . .
. . . . मवान्तरं पर आ षष्ठात् ।
. . . .
इति प्रग्रहाध्यायं संपू . ॥

Six extra leaves at the end contain the Viṣṇusahasranāmaphalas'ruti.

1033. 25. D. 13.

Palm-leaf. 29 folia. 14¼″×1$\frac{3}{10}$″. 6 or 7 lines in a page. Grantha script. Old. Slightly worm-eaten; injured. Fairly well written in a medium hand. Inked.

The S'amāna ends fol. *3a*, the Vilaṅghya fol. *5a*, the Napara fol. *6b*, the Tapara fol. *7a*, the Vilaṅghya of Nārāyaṇa fol. *9b*; all complete except the last which breaks off in the 28th verse.

1034. 25. L. 35.

Palm-leaf. 18 folia (1—18). 12″×1½″. 9 lines in a page. Grantha script. Old. Worm-eaten. Good medium writing. Inked.

The Saṃhitās'amāna (foll. 1—*3a*), Nārāyaṇa's Vilaṅghya (foll. *3a*—*6a*), S'aurisūnu's Natapara (foll. *6a*—*8a*), the Avarṇi (foll. *8a*—*10a*), the Āvarṇi (foll. *10a*—*11a*), S'rīvatsāṅka's Aniṅgya (foll. *11a*—*17a*), the Yaṇādes'asandhi (foll. *17a*—*18a*), the Yohiprāpti (fol. 18).

Colophon (fol. *18b*): इति सप्तलक्षणं समाप्तम् । हरिः ओम् ।

1035. 29. K. 34.

Palm-leaf. 44 folia. 13$\frac{3}{10}$″×1$\frac{3}{10}$″. 6—8 lines in a page. Grantha script. Old. Worm-eaten. Fairly well written in a medium hand. Inked.

The S'amānavyākhyāna—anonymous (foll. 1—*14b*), the Naparalakṣaṇa of S'aurisūnu (foll. *14b*—*19b*), the Naparalakṣaṇa of S'aurisūnu (foll. *20a*—*26b*), the Taparalakṣaṇa of S'aurisūnu (foll. *27a*—*31b*), the Naparataparalakṣaṇa of S'aurisūnu (foll. *31a*—*34b*), the Avarṇivyākhyāna—anonymous (foll. *35a*—*44b*).

All complete except the Naparalakṣaṇa No. 1. The Avarnivyākhyāna which seems to be the same as No. 4466 of the India Office Catalogue, Vol. II, Part I, begins: शुभमस्तु । ओं गुरुभ्यो मः ।

विशुद्धविज्ञानघनस्वरूपं विज्ञानविश्राणनबद्धदीक्षं ।
दयानिधिं देहभृतां शरण्यं देवं हयग्रीवमहं प्रपद्ये ॥
यस्य द्विरदवक्त्राद्याः पारिषद्याः परश्शतं ।
विघ्नं निघ्नंति सततं विष्वक्सेनं तमाश्रये ॥
नत्वाहं शिरसा देवीं चिन्मयीं राघवप्रियां ।
व्याख्यां वक्ष्ये शमानस्य विद्वत्प्रियकरीमिमां ॥
अथ यजुः संहिताया+तानि पदानि प्रवक्ष्मी ।
अथ शब्दो ऽधिकारार्थः प्रयुज्यते । अथ शब्दानुशासनमितिवत् ॥

1036. 19. D. 60.

THE SAPTALAKṢAṆAVYĀKHYĀ

सप्तलक्षणव्याख्या

Palm-leaf. 43 folia. 16″×1$\frac{4}{10}$″. 6 or 7 lines in a page. Grantha script. Old.

Worm-eaten and badly damaged. Well written in a medium hand. Inked.

The S'amānavyākhyāna (anonymous) ends fol. 16, the Vilaṅghyavyākhyāna of Nārāyaṇa fol. 33, the Nataparavyākhyāna of S'aurisūri (S'aurisūnu) fol. 43. The text of each is contained separately.

The S'amānavyākhyāna begins: हरिः ओं । शमानव्याख्या ॥

नत्वाहं शिरसा देवीश्चिन्मयीं केशवप्रियां ।
व्याख्यां वक्ष्ये शमानस्य विद्वत्प्रियकरीमिमां ॥
अथ यजुस्संहितायामाकारप्लुतपूर्वो॰ ॥

अथ शब्दोधिकारार्थः प्रयुज्यते । अथ शब्दानुशासनमितिवत् ॥

Ends: . . मकारपर इति किं । उपहूता धेनुः । हरिः ओं । श्रीमते रामानुजाय नमः । निगमांतार्यमहादेशिकाय नमः ॥

A note in Tamil on an old extra leaf at the beginning mentions Aras'āṇippalam Kadāmbi S'iṅgarācāryan as a former owner and warns against the stealing of the MS. Another in the same language on a recent leaf at the end gives Alas'ūr Tā S'rīnivāsan as another former owner.

1037. 19. D. 62.

Palm-leaf. 27 folia. $14\frac{4}{10}$" × $1\frac{8}{10}$". 6 or 7 lines in a page. Grantha script. Fairly old. Injured. Well written in a medium hand. Uninked.

The Nataparalakṣaṇavyākhyāna of S'aurisūnu (foll. 1—11*a*), the Avarṇivyākhyāna (foll. 11*a*—18*b*), the Āvarṇivyākhyāna (foll. 18*b*—23*b*), the Aniṅgyavyākhyāna of S'rīvatsāṅka (foll. 23*b*—27*b*); all complete except the last, *i.e.* the Aniṅgyavyākhyāna. The Avarṇivyākhyāna and the Āvarṇivyākhyāna are the same as Nos. *727* and 741 respectively. The name of the author of the Nataparalakṣaṇa is here spelt as S'aurisūri.

Colophon to the Āvarṇivyākhyāna: अवर्णावर्णयोः व्याख्यानं समाप्तम् ।

According to a note in Tamil on a fly-leaf at the beginning, the MS. formerly belonged to Veṇugopālan.

1038. 19. K. 52.

Palm-leaf. 12 folia (1—12). 15"×$1\frac{1}{4}$". 7 or 8 lines in a page. Grantha script. Old. Damaged. Bad medium writing. Uninked.

The Naparavyākhyā (only a fragment of the concluding portion, author not mentioned) ends folio 1*b*, the Avarṇivyākhyā (same as No. *727*, complete) folio 9*a*, the Āvarṇivyākhyā (same as No. 741, incomplete, the commentary on the last verse missing) folio 12*b*.

The Naparataparavyākhyā ends: यत्र क्वचन तेनैवेति येन मार्गेण पूर्वं दृष्टं यत्र क्वचन शाखादौ तेनैव मार्गेण अद . . न्नतांतं नकारांतमालोच्य ज्ञेयमित्यर्थः ।

सगुणा वेदविदुषा रचिता . . . . . ।
. . . . भूषणमित्यर्थः ॥ इति नपरतपरव्याख्यानं समाप्तम् । हरिः ओम् ॥

1039. 30. H. 35

Palm-leaf. 75 folia. $13\frac{1}{2}$" × $1\frac{1}{4}$". 8 or 9 lines in a page. Grantha script. Old. Damaged. Good small writing. Inked.

The Vilaṅghyavyākhyā of Nārāyaṇa (complete) ends fol. 8*a*, the S'amānavyākhyā (author not mentioned, complete) fol. 21*a*, the Aniṅgyavyākhyā of S'rīvatsāṅka (complete) fol. 55*a*, the Avarṇivyākhyā (anonymous, incomplete) fol. 56*a*, the Naparavyākhyā Padadarpaṇa of Mallayārya (complete) fol. 62*a*, the Taparavyākhyā—Padadarpaṇa of Mallayārya (complete) fol. 64*a*, the Avarṇivyākhyā (a second copy of the above which is complete) fol. 71*a*, the Āvarṇivyākhyā (same as No.741, complete) fol. 75*a*.

The S'amānavyākhyā begins: श्रीगणपतये नमः । अथ यजुस्संहितायामाकारप्लुतपूर्वो घोषवद्व्यञ्जनोत्तरसशकारपरो वसर्जनीय्यो येषु पदेषु लुप्यते तानि वक्ष्यामः । तत्रायमथशब्दो मंगळाचरणार्थः । तथा चोक्तं—

ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्वा विनिर्यातौ तस्मान्मांगळिकावुभौ ॥

आकारश्च प्लुतश्च आकारप्लुतौ । तौ पूर्वौ यस्मात् तथोक्तः ।

Ends: मकारपरः । देपरे होत्र । इतिशब्दो लुप्तविसर्गो न भवति । सदा विसर्जनीयो नास्तीत्यर्थः । यथाहोरात्रादेयो वह्निः । एकारेण किं । वि होत्रा दधे । हूताः मकारपरः । हता इत्यस्मिन्विसर्जनीय्यः मकारपरः सन् संहितायां लुप्यते । यथा उपहूता मनुष्या इत्याह । मकारपर इति किं । उपहूता धेनुः । हूता इति किं । अन्तर्हृदा मनसा पूयमानाः ॥

गजडाद्यास्त्रयो वर्णा दादयश्चैव बादयः ।
यादिवांतो हकारश्च शासौ तावन्यसंयुतौ ॥

The Avarṇivyākhyā begins:

अवर्णिन्यनुक्तं समोप्यातिरिक्तं
परित्यज्य दुष्कीर्तितं चाभिवीक्ष्य ।
ककारादिवर्णक्रमेणाहमेतं
सद्वृत्तिं करिष्यामि विस्पष्टवाच्यं ॥

लक्षणारंभवैय्यर्थ्यं: . शंक्य परिहरति । पूर्वेषु लक्षणेषु अनुक्तं यतदस्मिन् लक्षणे समोप्य उक्त्वा तत्रातिरिक्तं अधिकं दुष्कीर्तितमबद्धं च अस्मिन् लक्षणे परित्यज्य० ॥

Ends:

अहरंताहरश्चाहरश्चाहारभार्षं चाहुतादहं ।
वुहास्था अहरताश्चैवमुक्तो ह्रस्वस्य संग्रहः ॥

तस्यां मश्शमाहरंत । सप्तरात्रमाहरत्तेन । अग्निस्तत्पुनराहाः । आ त्वाहार्षौ . . एको हतादेकः । पथ्याहं गच्छे । कथाहास्था इति । तमाहरतां इत्यनेन प्रकारेण ह्रस्वस्य संग्रहः । इत्यवर्णिस्समाप्ता ॥ श्रीः ॥

On folio 9*b*:

यदादिद्वये जपेन्मंत्रं दशवार दिने दिने ।
अकाले नित्यकर्माणि काले काले कृतानि वै ॥

This is followed by a few Ṛks beginning with यदा दीध्येन० ॥

On an extra leaf inserted between folia 56 and 57:

ङनौ यत्र पदान्तेषु यवहेष्वृत्तरेषु च ।
द्वित्वं नैवाभिगच्छेतां ङनौ प्यवृपरौ विना ॥
पदान्तस्य नकारस्य यवहेषु परेषु च ।
नकारयवहां मद्व्ये संयक्तत्वं न विद्यते ॥

1040. 1. A. 19.

THE SARVASAMMATAS'IKṢĀ OF KES'AVĀRYA

सर्वसम्मतशिक्षा—केशवार्यकृता

Paper. 13 folia (pp. marked 51—76). $8\frac{1}{4}'' \times 6\frac{1}{2}''$. 14 lines in a page. Grantha

script. Bound in book form. Modern. In excellent condition. Fairly well written in a medium hand.

A treatise on Vedic phonetics, by Kes'avārya.

Complete.

Begins: सर्वसंमतशिक्षाप्रारंभः ।

ध्यात्वा सर्वजगंनाथं सांबं सर्वार्थसाधकं ।
व्याख्यायतेधुना शीक्षा सर्वसंमतलक्षणा ॥
कृपालुं वरदं देवं प्रणिपत्य गजाननं ।
स्वराद्वित्वमवाप्नोति व्यंजनं व्यंजने परे ॥
स्पर्शो लकारपूर्वोवपूर्वश्च द्विरुच्यते ।
स्वरपूर्वस्य रेफस्य परस्ताद्व्यंजनं स्थितं ॥
आपद्ये ते द्विवर्णं तद्वर्णमात्रे परे सति ।
ह्रस्वपूर्वौ नंदौ द्वित्वमापद्येते पदांतगौ ॥

Ends:

पदक्रमविशेषज्ञो वर्णक्रमविचक्षणः ।
स्वरमात्रविभागज्ञो गच्छेदाचार्यसंसदं ॥
ऋषिभिर्बहुधा प्रोक्तं वेदविद्भिस्तथापि हि ।
अध्येतृभिस्समस्तै तु यद्गृहीतं तदीरितं ॥
सर्वसंमतशिक्षापि संप्रदायानुसारतः ।
वासुदेवप्रसादेन व्याख्याता लक्षणेन वै ॥

हरिः ओम् । श्लोकसंख्या २३९ । सर्वसंमतशिक्षा समाप्ता ॥

The first and last verses evidently belong to a commentary.

For this see the Descriptive Catalogue of the Government Oriental Manuscripts Library, Madras, Vol. II, Nos. 996 sq.; Keith, India Office Catalogue, Vol. II, Part 1, Nos. 4956 sq.

1041. 25. L. 35.

Palm-leaf. 6 folia (22 sq.). 12"×1½". 9 lines in a page. Grantha script. Old. Worm-eaten and injured. Fair medium writing. Inked.

Incomplete.

Begins: सर्वसम्मतशीक्षा ॥

कृपालुं वरदं देवम् प्रणिपत्य गिराम् गुरूम् ।
द्वित्वादीनाम् प्रवक्ष्यामि लक्षणम् सर्वसम्मतम् ॥
स्वराद्वित्वमवाप्नोति व्यञ्जनम् वञ्जने परे ।

Ends:

द्विमात्रश्च त्रिमात्रश्च प्राप्यते सानुनासिकम् ।
धिकृछब्दादभिनिहतो ब्राह्मणो उच्च इष्यते ॥
समलोपनिषेधे तु वैपरीत्यं वदेत् बुधः ।
विरामपञ्चमानां तु नदसंज्ञाः प्रकीर्त्तिताः ॥
हरिः ओम् । श्रीगुरुभ्यो नमः ॥

1042. 8. E. 34.

THE SARVASAMMATAS'IKṢĀVYĀKHYĀ OF MAÑCIBHAṬṬA

सर्वसम्मतशिक्षाव्याख्या—मञ्चिभट्टकृता

Paper. 40 folia (pp. marked 64—142). 8" × 6$\frac{2}{10}$". 16 lines in a page. Devanāgarī script. Bound in book form. Modern. In good condition. Fair medium writing.

From No. 1046 it is known that the commentator Mañcibhaṭṭa was the son of Vāñches'vara and Veṅkaṭāmbā, and the disciple of S'rīnivāsa.

Incomplete.

Begins:

कृपालुं वरदं देवं प्रणिपत्य श्रियःपतिम् ।
द्वित्वादीनां प्रवक्ष्यामि लक्षणं सर्वसंमतम् ॥

कृपालुं कृपारूपमित्यर्थः । वरदं स्वाश्रितेभ्योभीष्ठफलप्रदम् । देवं श्रियःपतिं प्रणिपत्य प्रकर्षेण भक्तिश्रद्धापूर्वकं नत्वा द्वित्वादीनां दित्वमादिर्येषां तेषां द्वित्वपूर्वकागमविकारादीनां सर्वसम्मत सर्वेषां तैत्तिरीयशाखोपयोगिनां प्रातिशाख्यप्रभृतीनां संमतं समानार्थं लक्षणं लक्ष्यते प्रकाश्यतेनेनेति लक्षणं प्रवक्ष्यामि निर्दोषं रचयामीत्यर्थः ॥

Ends :

गीती शीघ्री शिरःकंपी यथालिखितपाठकः ।
अनर्थज्ञोल्पकण्ठश्च षडेते पाठकाधमाः ॥

एते षट् पाठकेषु मध्ये त्रिषु अधमा निकृष्टाः अप्रामाणिका इत्यर्थः । तानाह—गीती गीतं विहितकालाधिक्यं वर्णानां तदस्यास्तीति गीती । शीघ्री द्रुतता तदस्यास्तीति शीघ्री । यथालिखितस्य पाठकः । अध्येता लि . . . . ।

On a fly-leaf at the end :

"Collated by Pandit K. S. Hariharasastri and Y. Venkatramasastri, from the original MS. of Puranika Kesavachar, Belur, Mysore, 29-5-16."

1043. 19. E. 42.

Palm-leaf. 7 folia (1—7). 15″×1½″. 6—8 lines in a page. Grantha script. Wooden board at either end. Old. Worm-eaten and injured. Bad large writing. Uninked.

Incomplete.

Begins :

. णेश्वरं प्रणम्याहं लोकपालान् गृहान् गुरून् ।
सर्वसम्मतशीक्षाया वक्ष्ये व्याख्यामनुत्तमां ॥

प्रारिप्सितस्य गंधस्याविघ्नेन परिसमाप्तये प्रचयगमनाय च शिष्टाचारपरिसमाप्तेष्टदेवतानमस्कार . . र्वकगंधारंभं प्रतिजानीते ॥

Ends :

स्वरेभ्यः प्रथमात् पूर्वं ऊष्मा द्वित्वं नापद्यते ।
तथा विसर्गो रेफश्च द्वित्वं नापद्यते क्वचित् ॥

यथा यद्दर्शपूर्णमासौ । अश्मन्नूर्जं । मनः क्षेमे । ऊर्क्च मे । स्वरेभ्य इति किं । दार्श्यं यज्ञं ।

अनुत्तमात् पवर्गीयात् सवर्णात् पूर्वतस्थितः ।

समानो वर्गः सवर्गः तत्र भवः सवर्गीयः । उत्तमव्यतिरिक्तात् सवर्गीयात् पूर्वतः पूर्वत्र स्थितः तद्वर्गीयः समानो वर्णः तस्मा . . . . ।

1044. 19. E. 42.

Palm-leaf. 18 folia (8 sq.). 15″ × 1½″. 6—8 lines in a page. Grantha script. Wooden board at either end. Old. Worm-eaten and injured. Bad large writing. Uninked.

Incomplete.

Begins : हरिः ओम् । शुभमस्तु ॥

गणेश्वरं प्रणम्याहं लोकपालान् गुरूनपि ।
सर्वसम्मतशीक्षाया वक्ष्ये व्याख्यामनुत्तमां ॥

प्रा . प्सितस्य गन्धस्याविघ्नेन परिसमाप्तये प्रचयगमनाय च शिष्टाचारपरिसमाप्तेष्टदेवतानमस्कार० ॥

Ends :

ह्रस्वत्वं यच्च देहस्य त्वंगानामृदुता च यः ।
कण्ठाकाशमहत्वं च नीचजन्मनि हेत . ॥

अद्य देहस्य यधृस्वत्वं स्वाभाविकपरिमाणाल्पत्वं अंगानां मृदुता शैथिल्यं कं . काशस्य महत्वं विवृतत्वं च । यत् एता निचस्यानुदत्तध्वनिधर्मस्य हेतवः ॥

1045. 25. L. 15.

Palm-leaf. 27 folia (1—27). $16\frac{2}{10}'' \times 1\frac{2}{10}''$. 6 lines in a page. Grantha script. Old. Worm-eaten and damaged. Good small writing. Inked.

Complete.

Begins :

. . शं वरदं देवं प्रणिपत्य गजाननं ।
द्वित्वादीनां प्रवक्ष्यामि लक्षणं सर्वसम्मतं ॥

. . . . . . जिगीषुं गजाननं गजवक्त्रं प्रणिपत्य भक्तितो नत्वा द्वित्वादीनां द्वित्वमादिर्येषां तेषां . . . . स्वोपयोगिनां प्राति शाख्यप्रभृतीनां लक्षणानां सम्मतं समानार्थं लक्षण . . . . मि निर्दोषं प्रपञ्चयिष्यामि ॥ १ ॥

Ends :

हस्तहीनं तु योधीते स्वरवर्णार्थवर्जितः ।
ऋग्यजुस्सामाभिर्दण्डो विनियोनिमधिगच्छति ॥

हस्तहीनमिति । वियोनिं नरकपातमित्यर्थः ।

मन्त्रो हीन स्वरतो वर्णतो वा
मित्थ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति
यथेन्द्रशत्रु स्वरतोपराधात् ॥

मन्त्र इति ॥

स्वरवर्णान् स्फुटमत्वा सम्यग्यश्च समुच्चरेत् ।
अत्युत्कृष्टफलं तस्य तत्र तत्र समीरितं ॥

स्वरेति । तत्र तत्रेति । . राणादावित्यर्थः ॥

हस्ते वेदं योधीते स्वरवर्णार्थसंयुतः ।
ऋग्यजुःसामभिः पूतो ब्रह्मलोके महीयते ॥

हस्तेनेति ॥

पदक्रमविशेषज्ञो वर्णक्रमविचक्षणः ।
स्वरीमात्राविभागज्ञो गच्छेदाचार्यसंपदं ॥

पदेति ॥

स्तूरिदेवबुधेन्द्रस्य नन्दनेन महात्मना ।
प्रणीतं केशवार्येण लक्षणं सर्वसम्मतं ॥

स्तूरिदेवेति स्पष्टोर्थः ॥

इत्यामूरिमश्रीभट्टविरचितं सर्वसम्मतशीक्षाविवरणं इत्यनिर्म्मलं । हरिः ओमः । श्लोकं १३९ ॥ शिवार्पणमस्तु ॥

1046. 25. L. 30.

Palm-leaf. 44 folia. $8\frac{1}{2}'' \times 1''$. 5 or 6 lines in a page. Grantha script. Old. Worm-eaten. Cursive small writing. Inked.

Incomplete.

Begins :

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजं ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥

ओम् ।

मात्रे श्रीवेंकटांबायै पित्रे वाञ्छेश्वराय च ।
नम श्रीदेशिकाद्यायान्नरायेशाय सर्वदा ॥
सुरासुराशिरोरत्नं श्रीनिवासगुरूनपि ।
सर्वसम्मतशीक्षाया वक्ष्ये व्याख्यानमुत्तमां ॥

प्रारीप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्तये शिष्टाचारप्रचयगमनाय च शिष्टाचारपरिप्राप्तं देवतानमस्कारपूर्वकं ग्रन्थारंभं प्रतिजानीते—कृपालुमिति ।

कृपालुं वरदं देवं प्रणिपत्य श्रियः पतिं ।
द्वित्वादीनां प्रवक्ष्यामि लक्षणं सर्वसम्मतं ॥

कृपालुं कृपस्वरूपं वरदं स्वाश्रितेभ्योभीष्टफलप्रदन्देवं विजिगीषुं श्रियःपतिं रमापतिं प्रणिपत्य प्रकर्षेण

भक्तिश्रद्धापूर्वकं नत्वा द्वित्वादीनां द्वित्वमादिर्येषां द्वित्वपूर्वागमे लोपागमाधिकारादीनां सर्वसम्मतं सर्वेषां तैत्तिरीयशाखोपयोगिनां प्रातिशाख्यप्रभृतीनां लक्षणानां सम्मतं समार्त्थं लक्षणं वक्ष्यते प्रकाश्यतेनेनेति लक्षणं प्रवक्ष्यामि निर्दोषश्चर्चयामि ॥

Ends :

गीती शीघ्री शिरःकंपी . थालिखितपाठकः ।
अनर्थज्ञोल्पकण्ठश्च षडैते पाठकाधमाः ॥

एतेषु षट्पाठकेषु अद्धयेत्रिषु अधमाः तानाह । गीती गीतं हितकालाधिक्यं वर्णानामेतदस्यास्तीति । शीघ्रं द्रुतता तदस्यास्तीति शीघ्र . . । शिरसः कंपनं भ्रूनेत्रादिविकारो वा तदस्यास्तीति शिरः शिरःकंपी । यथालिखितपाठकः लिखितेकोपाद्ध्यायाद्ध्येता । अनर्थज्ञः लक्षणज्ञानरहि . . . . ।

On an extra folio at the end : यश्च वयं द्विष्मस्तमिहन्मि आश्यावधितयन्तमध्वर्यूमनुमन्त्रयते । आश्रावय . . त्ययशस्ये ब्रह्मवर्चसाय इति । प्रवणानं देवसवितरेतं त्वात्र . . . ण द्यावापृथिमां पातागनिर्होतारम्मानुषा+मानुष इत्यध्वर्यो . . . रसेनोत् पर्जन्यस्य धामभि रूदस्थाममृता॰ अनु । उत्तिष्ठेत् . . . रमन्तरा विछूत्ताः सिनन्ति पाकमिति धीरयेति उत्थाय जवति । तस्य . . . रभामहै हो अवपरो . . तं येना यन्नेते . स . . . . होतृषदनमभिमन्त्रयते । अहेदैधिषध्व उदस्तिष्ठ । अन्यस्य . . . दना । अणं दक्षिणानि रमेत् । निरस्तपरावसुः अपूपस्पृ . . . विशेत् । देवं बर्हि स्वापस्थं त्वाध्या स देयं उपविश्च . . . . . ॥

1047. 28. J. 17.

Palm-leaf. 26 folia. $15\frac{3}{8}'' \times 1\frac{1}{4}''$. 7 or 8 lines in a page. Grantha script. Old. Damaged. Fairly well written in a medium hand. Uninked.

Complete.

Begins :

गणेश्वरं प्रणम्याहं लोकपालान्गुरूनपि ।
सर्वसंमतशिक्षायाः वक्ष्ये व्याख्यामनुत्तमां ।

पारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्तये प्रचयगमनाय च शिष्टोपचारपरिसमाप्तेष्टदेवतानमस्कारपूर्वकं ग्रन्थारभं प्रतिजानीते ।

गणेशं वरदं देवं प्रणिपत्य गजाननं ।
द्वित्वादीनां प्रवक्ष्यामि लक्षणं सर्वसमतं ॥

Ends :

हस्तहीनं तु योधीते स्वरवर्णविवर्जितं ।
ऋग्यजुस्सामभिर्दग्धर्वियोनिमधिगच्छति ॥

वियोनिं नरकपतनमित्यर्थः ॥

मन्त्रो हीन स्वरतो वर्णतो वा
मित्थ्याप्रयुक्तो न तमर्त्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति
यथेन्द्रशत्रु स्वरतोपराधात् ॥
स्वरवर्णा स्फुटं मत्वा सम्यग्यश्च समुच्चरेत् ।
अत्युत्कृष्टफलं तस्य तत्र तत्र समीरितं ॥

तत्र तत्रेति पूरणादिष्वित्यर्थः ।

हस्तेन वेदं योधीते स्वरवर्णार्त्थसंयुतं ।
ऋग्यजुस्सामभिः पूतो ब्रह्मलोके महीयते ॥
पदक्रमविशेषज्ञो वर्णक्रमविचक्षणः ।
स्वरमात्राविभागज्ञो गच्छेदाचार्यसंसदं ॥
सुरदेवबुधेन्द्रस्य नन्दनेन महात्मना ।
प्रणीतं केशवार्येण लक्षणं सर्वसमतं ॥

इत्यामूरिमश्चिभट्टविरचिते सर्वसंमतशिक्षाविवरणे निर्मलं संपूर्णं ॥ श्रीकाशीपत मम गुरवे नमः हरिः

ओम् । धर्म्मसंवर्द्धनीसमेतश्रीपञ्चनदीश्वराय नमः । ज्ञानप्रसूनांबिकासमेतश्रीकाळहस्तिपतये दक्षिणकैलासपतये नमः । श्रीआका.भैरवकल्पे पर्वतवर्धसमेतश्रीसेतुपतये नमः ॥

1048. 29. I. 28.

Palm-leaf. 12 folia (77 sq.). 17¼"×1½". 6 or 7 lines in a page. Grantha script. Wooden board at either end. Old. Worm-eaten and damaged. Fairly well written in a medium hand. Uninked.

Incomplete; stops with the Aṅga-prakaraṇa.

Begins: ओं ।

विष्वक्सेनं प्रणम्याहम् लोकपालान् गृहान् गुरून् ।
सर्वसम्मतशीक्षाया वक्ष्य व्याख्यानमुत्तमाम् ।

प्रारिप्सितस्य ग्रन्त्थस्याविघ्नेन परिसमाप्तये च प्रचयगमन . . च शिष्टाचारपरिप्राप्तेष्टदेवतानमस्कारपूर्वकगृन्त्थारम्भम् प्रतिजानीते ।

Ends:

न ह्यूष्मप्रकृतिः स्पर्शः पूर्वांगमवाप्नुयात् ।
यथा . यच्छमश्रुणस्तत् । ऊष्मप्रकृतिरिति किम् । इषे त्वा । स्पर्श इति किम । रुद्रस्य । अत्र शकारत्वमूष्मप्रकृति । इति सर्वस . . गप्रकरणम ॥

1049. 20. D. 84.

THE SARVĀNUKRAMAṆĪ OF KĀTYĀYANA

सर्वानुक्रमणी—कात्यायनकृता

Palm-leaf (S'rītāla). 31 folia (marked 1—37, foll. 18—20, 22, 26, and 34 missing). 8"×1$\frac{8}{10}$". 10 or 12 lines in a page. Grantha script. Old. In a fairly good condition. Good small writing. Inked.

Incomplete, portions being lost in the missing leaves.

Ends: ऋतं माधुश्छंदसोघमर्षणो भाववृत्तमानुष्टुभं तु सं संचतुष्कं संवननस्सांज्ञानमाग्नेय्याद्या तृतीया त्रिष्टुप् तृतीयत्रिष्टुप् । नमश्शौनकाय नमश्शौनकाय ॥ इत्यष्टमोष्टकः ॥ सर्वानुक्रमणी समाप्ता ॥

वृत्तिं षाद्गुरवीं व्याख्यां सर्वानुक्रमणीमृचां ।
संविविच्य चतुर्वेदस्सर्वेक्रतुवरोलिखत् ॥
अथ ऋग्वेद इत्यादितृतीयात्रिष्टुबन्तकं ।
इदं शास्त्रमधीयानो देवतास्थानतामियात् ॥
ऋषिच्छंदोदैवतादिविज्ञानफलमुच्यते ।
ऋषीनामार्षगोत्रज्ञ ऋषेस्संस्थानतामियात् ॥
एकैकस्य ऋषेर्दिव्यसहस्रंब्दतिथिर्भवेत् ।
छंदसामपि सालोक्यं छंदोज्ञानादवाप्नुयात् ॥
तस्यास्तस्या देवतायास्तत्भावं प्रतिपद्यते ।
यां यां विजानाति नरे देवतामिति निर्णये ॥
सर्वज्ञो धृतिमानृषिर्जायते यदि जायते ।
न ह्येतत्ज्ञानमित्यादिसूत्र एव महात्मना ॥
उक्तमज्ञस्य नैष्कल्यं सर्वकर्मसु सर्वदा ।
किं च स्वयं शौनकोऽपि ब्रवीत्यत्र महत्फलं ॥
ऋषिर्नामार्षगोत्रज्ञ ऋषिभ्योस्तु सदा नमः ।
ऋषी विषयज्ञस्तु यश्शरीरात्प्रमुच्यते ॥
सोतीत्य तमसः पारं स्वर्गे लोके महीयते ।
सहस्रयुगपर्यंतंहर्यंत ब्राह्मणमुच्यते ॥
नाकस्य पृष्ठे तं कालं दिवि सूर्य इव रोचते ।
स्वाद्ध्यायमुत योधीते मंत्रदेवर्षिविच्छुचिः ॥
स तत्र दिवसं स्वर्गे सत्रसत्भिरपीड्यते ॥

इति फलश्रुतिः ॥

सर्वानुक्रमणी सैषा कात्यायनमुनेः कृतिः ।
समाप्तैकाद्ध्यायवती षट्सप्ततिखण्डिका ॥

अनुवाकानुक्रमणीं सर्वानुक्रमणीमपि ।
प्रातिशाख्यमृचां नात्र व्यलिखद्वकुळेश्वरः ॥
हरिः ओम् ॥ शुभमस्तु ॥

1050 28. F. 35.

Palm-leaf. 17 folia (3 sq.). 14"×1$\frac{8}{10}$". 9 or 10 lines in a page. Telugu script. Old. Slightly injured. Good small writing. Inked.

Complete.

At the end : स्मृतिसारसमुच्चये वृषाकपिः—

वैश्वेदेवं प्रकुर्वीत स्वशाखागृह्यानुसारतः ।
नरव्यजनवलीकचक्राद्याकारभेदतः ॥
तदनेन विद्यं तत्र सहकारेण बह्वृचाः ।
कुर्युः प्रयोगशास्त्रज्ञा पूर्वाचार्यानुसारतः ॥
चक्राकारं वैश्वदेवं ये कुर्वंत्याश्वलायना ।
ते कुर्वंत्यप्रयोगज्ञा नैतवाचार्यसंम्मतं ॥
चक्राकारं वैश्वदेवं कुर्याच्चेदाश्वलायनः ।
न तेन शुद्धिमाप्नोति ह्यातात्हानामशास्त्रतः ॥

व्यासः—

वैश्वदेवं नराकारं ये कुर्युर्बह्वृचोत्तमाः ।
ते भवंति सदा शुद्धाः पुत्त्रकांतो धनान्विताः ॥
भूतयज्ञं नराकारं प्रकुर्यादाश्वलायनः ।
यज्ञत्वाद . . हो मत्वादुद्दशत्यागसंयुतं ॥

अनग्न्यधिकरणे त्वेपि अग्निहोत्र सर्वदैव जनाहुत्यादिषु दर्शपूर्णमासयोः परिध्याहुतिषु आ . . . . पुश्वनाद्याहुतिषु च होमश्चे . . देशत्यागदर्शनादत्राप्युदेशत्यागः कर्तव्यः ॥ आश्वलायनकारिकासु ॥

1051. 40. A. 98.

Paper. 37 folia. 9¾"×4½". 8 lines in a page. Devanāgarī script. Old. In good condition. Good medium writing.

Complete.

Ends: अनुवाकानुक्रमणी स्मातः । श्रीः । ओं स्वस्ति सवत् १६७६ वर्षे माघशीर्षमाग्रे शुक्लपक्षे श . . अद्येह नटपद्रवास्तव्यं बाह्मषखेल . . . ज्ञातीयदवे श्रीवंतसुतकल्याण तथा आत्माराम तथा श्रीराम तथा जेरमपठनार्थं । शुभं भवतु । कल्याणमस्तु ॥

यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥
ल्यखितं श्रीरामा । श्रीरामार्पणमस्तु । श्रीगणेशाय नमः ॥

त्रिः प्राश्यापो द्विरुन्मृज्य मुखमेतानुपस्पृशेत् ।
आस्यनासाक्षिकर्णांश्च नाभिवक्षःशिरोंसकान् ॥
अंगुष्ठेन प्रदेशिन्या घ्राणं चैवमुपस्पृशेत् ।
अंगुष्ठानामिकाभ्यां च चक्षुः श्रोत्रं पुनःपुनः ॥ २ ॥
कनिष्ठांगुष्ठयोर्नाभिं हृध्यं तु तलेन वै ।
सर्वाभिस्तु शिरः पश्चात् बाहू चाग्रेण संस्पृशेत् ॥३॥
माषमेकं सुवर्णस्य यत्र मजयते मणी ।
तत्र आचमनं प्रोक्तं पवित्रं कायशोधनं ॥ ४ ॥

1052. 41. B. 76.

Paper. 25 folia (numbered 1---48, foll. 16 and 19—40 missing). 9½"×4". 7 lines in a page. Devanāgarī script. Old. Damaged. Good large writing.

Incomplete. Fol. 18 breaks off with Sūtra 3. 45 and fol. 41 begins with Sūtra 10. 72.

At the end : इति श्रीऋग्वेदे सर्वानुक्रमणिका समाप्ताः ॥

यादृशं पुस्तकं दृष्ट्वा तादृशं लिखित मया ।
यदि शुद्धमशुद्धं वा मोमदाषो न दीयते ॥
तैलाद्रक्षे जलाद्रक्षेद्रक्षे श्रथलबधनात् ।
परहस्तगताद्रक्षे एवं वदति पु . . ॥ १ ॥

लेखकपाठकयो शुभं भवतु । संवत १७१९ वर्षे कार्त्यगशुद . . . रवै लखितं नागरन्यात पंडागोपीनाथसुतन्नगनथती पोथी ॥

1053. 41. C. 49.

Paper. 22 folia (numbered 18—40, fol. numbered 36 missing). 8″ × 4″. 8 lines in a page. Devanāgarī script. Old. Edges slightly injured. Fair large writing.

Incomplete, from Maṇḍala 4, Sūkta 10 to Maṇḍala 10, Sūkta 72.

1054. 38. H. 6.

THE SARVĀNUKRAMAVṚTTI (SARVĀNUKRAMABHĀṢYA) OF UVVAṬA

सर्वानुक्रमवृत्तिः (सर्वानुक्रमभाष्यम्)—उव्वटकृता

Paper. 151 folia. 8″ × 6½″. 15 lines in a page. Devanāgarī script. Bound in book form. Modern. In excellent condition. Beautiful medium writing.

Complete but for many small lacunæ in almost every page.

Begins: सर्वानुक्रमभाष्यं ।

चतुर्मुखे मुखांभोजे वनहंसवधूर्मम ।
मानसरम . . . . ॥ १ ॥
सचराचरमुनिमान्ये चतुराननवदनकलहंसि ।
मम हृदयकमलकोद्भवगृ . . . . . . रमं वाग्देवि ॥
लक्ष्मीधरं सूक्ष्मचक्रिणं शंखधारिणं ।
विष्णुं पद्मदलाभासं प्रपद्ये . . . सदा ॥
कर्तारं सर्वशास्त्राणां वंदेज्ञानरिपुं भवं ।
स्रष्टारं सर्वलोकानां पतेदक्षयका . . ॥
अगजाननवीक्षणहृष्टतनुं त्रिजगत्पतिसंस्तुतपादयुगं ।
त्रिपुरांतकबाणविनाश . . . . . पितरं प्रणमामि सदा ॥
इहाम्नायपुरुषसिद्धेः कारणमिष्यते ।
आर्षेयादि . . . . . र्तव्यमिति तत्कुतः ॥

Ends:

अशीतिश्च पदानां तु शतसहस्रमेकं दश चाधानि सहस्राणि सप्तशतानि . . . . . वंत्येषु खल्वमूनि चर्चापदानि । अक्षराणां प्रयुतानि चत्वारिंशद्वात्रिंश . . . . म्नातं चतुःषष्ठ्याखिलरहिता नित्याः ॥ श्री ॥

इति सर्वानुक्रमभाष्ये अष्टमाष्टके . . . ध्यायः । समाप्तश्चेदं ग्रंथं । शके १९८३ संवत् १७१८ । व्ययनामसंवत्सरे पौषशु . . . १ गुरौ । तद्दिने इदं पुस्तकं समाप्तः ।

यादृषे पुस्तकं दृष्ट्वा तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न विद्यते ॥
भग्नपृष्ठकटिग्रीवा स्तंभदृष्टिरधोमुखः ।
कष्टेन लिखितं ग्रंथं यत्नेन . . . . . ॥

शामभट्टवामनाचार्येदं पुस्तकं समाप्तं । लेखकपाठकयोः शुभं भवतु ॥ रघु . . . श्री । परोपकरार्थं इदं पुस्तकं । श्री ॥

On a fly-leaf at the end:

"सर्वानुक्रमवृत्तिः from Poona. Complete. Author—Uvvaṭa? This transcript was made from the Manuscript of the Bhandarkar Oriental Research Institute, Poona. The original is entered as No. 38 in the Catalague of the Government Collections of Manuscripts, Deccan College, Poona, 1916."

For this and other commentaries on the Sarvānukramaṇī see Prof. C. Kunhan Raja, Annals of Oriental Research, University of Madras, Vol. V, Part 2, pp. 1 *ff*.

1055. 38. H. 21

THE SARVĀNUKRAMAṆĪVṚTTI (SARVĀNUKRAMADĪPIKĀ) OF GAṆES'A ḌĀṀ(DO)KHAḶE

सर्वानुक्रमणीवृत्तिः (सर्वानुक्रमदीपिका)—गणेशडां-(डो)खळेकृता

Paper. 408 folia. 2 Vols. (pp. marked 1—464 and 465—816). 8″ × 6½″. 14 lines in a page. Devanāgarī script. Bound in book form. Modern. In excellent condition. Good medium writing.

The commentator Gaṇes'a was the son of Kṛṣnabhaṭṭa. He refers to Vidyāraṇya and must be later than the latter.

Complete.

Begins : श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः । सर्वानुक्रमदीपिका ॥

वक्रतुण्डमहेशानं जगद्वन्द्यां सरस्वतीं ।
वेदब्रह्मगुरूंश्चैव प्रणतोऽस्मि यथाक्रमं ॥
वेदादिराजऋग्वेदे विख्यातः पुरुषो महान् ।
सैव नारायणः प्रोक्तस्तस्मै वेदात्मने नमः ॥
भट्टकृष्ण पिता यस्य जननी रुक्मिणी सती ।
यस्याग्रजो महादेवो डांखळेत्युपनामकः ॥
परिभाषा विभाव्याथ सर्वानुक्रममेव च ।

ओं अथ ऋग्वेदाम्नाये शाकळके । अथ शब्दो मङ्गले प्रस्तावे वा । अथ द्वितीयार्थः ।

अथशब्दः पूर्वमेव मङ्गलार्थः स उच्यते ।
स ब्रह्म परमं ज्ञेयं स्मरणात्सर्वतः शुभः ॥

अपि च—

ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्वा विनिर्यातौ तस्मान्माङ्गलिकावुभावपि ॥

ऋग्वेद ऋग्वंशबाहुल्या इत्यर्थः । मन्त्रब्राह्मणयोर्वेद इति वचनात् ।

ऋचां दशसहस्राणि ऋचां पंच शतानि च ।
ऋचामशीतिः पादश्चैतत्पारायणमुच्यते ॥

इति ग्रन्थान्तरवचनात् । तत्राम्नाये सम्यगभ्यासयुक्ते खिलरहित इति । तत्र वेदाभ्यासः पंचधा विहितः । अध्ययनं विचारोऽभ्यसनं । जपोऽध्यायनमिति । तथा च स्मर्यते—

वेदस्वीकरणं पूर्वं विचारोऽभ्यसनं जपः ।
तद्दानं चैव शिष्येभ्यो वेदाभ्यासो हि पंचधा ॥

Ends : इत्येवमदि न प्रयोजनानि । . ग्रास्थानानामत आचार्यो भगवान् शौनको वेदार्थवित् ब्राह्मणेभ्योऽर्थवादानुत्सृज्य वेदार्थमृग्वेदस्य शास्त्रं कृतवान् । अन्यथा वेदार्थो ज्ञातुं न शक्यत इति । तथा वेदाङ्गानि ज्ञानरूपितमिति । शाकलसंहितासूक्तसंख्या ॥ १०१७ ॥ सहस्राणि पञ्चशतान्यशीति अनुवाकसंख्या ८९ । पञ्चाशीति ग्रन्थसंख्या ९७९० ।

गणेशडोखळेनेयं लिखिता दीपिकोत्तमा ।
बालधीवृद्धिसिध्यर्थमेवं लक्षणमुत्तमम् ॥
गणेशडोखळेत्युपनामा धर्मार्थसाधनमोक्षकामाः ।
विद्वज्जनमनोह्रद्रमणीरचिता दीपिकानुक्रमणी ।
अनुक्रमणीदीपिका समाप्ता ॥

P 137 : इति श्रीमदृग्वेदानुक्रमणीदीपिकायां डोखळोपनामकृष्णभट्टसुतगणेशकृतौ परिभाषोदाहरणग्रन्थः समाप्तः । श्रीवक्रतुण्डाय नमः ॥

P. 24 : इति ब्राह्मणभाष्ये व्याख्यातेति । तत्र विद्यारण्यश्रीपादास्तु सोऽब्रवीदहमिदं० ॥

This is a transcript from a MS. in the Oriental Institute at Baroda (No 27 of the Descriptive Catalogue, Vol. 1, 1925).

1056. 38. H. 5.

THE SARVĀNUKRAMAṆĪVṚTTI OF RAGHUNĀTHA

सर्वानुक्रमणीवृत्तिः—रघुनाथकृता

Paper. 169 folia (pp. marked 1—337). 8″ × 6½″. 111 lines in a page. Devanāgarī script. Bound in book form. Modern. In excellent condition. Good medium writing. Complete.

Begins : श्रीः । श्रीगुरुभ्यो नमः । सर्वानुक्रमवृत्तिः । श्रीगणेशाय नमः । ॐ ॥

समानबुद्धिः परभेदशक्तिः
स्वशेषयुक्तिः क्रमकृन्तयुक्तिः ।
आस्तेऽतिदेशो ह सुबाधतन्त्रो
धर्मप्रसङ्गो भुवि रामभद्रः ॥ १ ॥
यो वेदेषु चतुर्वक्त्रो मीमांसायां च जैमिनिः ।
तर्के गौतमवद्विप्रो महेन्द्रस्तस्य भूपतेः ॥ २ ॥
पाकसंस्था हविस्संस्था सोमसंस्था प्रसिद्धये ।
दैक्षितचतुर्वेदिसुतो रघुनाथः कुशाग्रधीः ॥ ३ ॥
अहं करिष्ये व्याख्यानं नत्वा वाचं सुविस्तराम् ।
अनुक्रमणिकाख्यस्य ग्रन्थस्य सुखबोधकृत् ॥ ४ ॥

वेदवेदार्थदर्शी कात्यायनो मङ्गलं कुर्वन्कर्तव्यं प्रतिजानीते—अथ ऋग्वेदाम्नाये शाकलके सूक्तप्रतीकऋक्संख्यऋषिदैवतछन्दांस्यनुक्रमिष्यामो यथोपदेशम् ॥ अथशब्दः स्वरूपस्वार्थाभ्यां मंगलवेदार्थज्ञानानन्तर्ययोर्वर्तते अथातो धर्मजिज्ञासेतिवत् । सम्यगभ्यासविषये शाकलप्रवचनके ऋग्वेदे ऋग्वेदकुलेशे उपदेशमनतिक्रम्य सूक्तप्रतीकऋक्संख्यऋषिदैवतछन्दांस्यनुक्रमिष्यामः । सूक्तप्रतीक इत्यादौ तत्पुरुषगर्भो द्वन्द्वः । अनुक्रमिष्याम आदितः कथयिष्यामः । प्रतिज्ञा शिष्यप्रवृत्त्यनुकूला । अत्राकारस्य ऋति परे ऋत्यक इति ह्रस्वप्रकृतिभावौ । व्यतिरेकमुखेन प्रतिज्ञा । विषयार्थज्ञानस्य श्रौतस्मार्तकर्मफलसाधनत्वमाह — न ह्यतद्ज्ञानमृते श्रौतस्मार्तकर्मप्रसिद्धिः ॥

Ends : ऋतं च सत्यं तृचं अघमर्षणो भाववृतमनुष्टुप् । तु इति द्वयोः सूक्तयोरनुष्टुप् । संसमिच्चतुष्कं संवननः संज्ञानमनुष्टुप् । आद्याऽऽग्नेयी । समानो मन्त्र इति तृतीया त्रिष्टुप् । सूक्त ४९. ऋक् २१८ अत्राधिकं ग्रन्थान्तराद् ज्ञेयम् । बृहदेवतावत । इति चतुष्षष्टितमोऽध्यायः । इति सर्वानुक्रमणिकी किंचिद्वृत्तिः समाप्ता ॥ संवत् १८९९ सिद्धार्थिसंवत्सरे शके १७१० थाल्युपनामक शेषभट्टस्येदम् ॥

Here there is the following : "Copied by N. Ramanatha Sastri, Pandit, Adyar Library, Adyar, Madras. 20-5-1930."

The description of the original is given on a fly-leaf at the end : "Description : Face cover. No. 3 (in red pencil) अथ सर्वानुक्रमवृत्तिप्रारंभः पत्र १०३ seal. Library of the Bombay Branch of the Royal Asiatic Society. No. of lines 9. No. of letters per line about 30. Last face page : इति सर्वानुक्रमवृत्तिः समाप्ता. पत्रसंख्या १०३. seal also. Good handwriting, quite legible and correct. Copied in April and May 1930".

1057. 38. H. 5.

THE SARVĀNUKRAMAṆĪVṚTTI OF RĀMABHAṬṬA

सर्वानुक्रमणीवृत्तिः—रामभट्टकृता

Paper. 17 folia (pp. marked 1—34). 8″ × 6½″. 15 lines in a page. Devanāgarī script. Bound in book form. Modern. In excellent condition. Good small writing. Complete except some lacunæ.

Begins: श्रीसरस्वत्यै नमः। अथ ऋग्वेदाम्नाये शाकलके सूक्तप्रतीकऋक्संख्यऋषिदैवतछंदांस्यनुक्रमिष्यामो यथोपदेशं। अथेति मंगले प्रस्तावे च। ऋगंशबाहुल्याद्दग्वेदः। आम्नाये सम्यगभ्यासयुक्ते खिलरहिते। शाकलके। शाकल्यौच्चारणं शाकलकं। तत्रादितः प्रतीकं। ऋक्सख्या ऋचामेकत्वादिः। ऋषिर्द्रष्टा। ऋषयः सर्वार्थवेदिनः।

आर्त्तेः सनोतेः सेति च ऋषिशब्दो निरुच्यते।
ऋषयोऽनागतातीतवर्तमानार्थवेदिनः॥

दैवतं। छंदः पापेभ्यश्छादनात्। छादयन्ति ह वा एनं छन्दांसि पापात्कर्मण इति श्रुतेः।

Ends:

प्रगाथा वहिता ये च तेषां शतमुदाहृतं।
चतुर्नवतिरेवोक्तास्तद्द्वर्णास्वसंशयः॥ ९॥
काकुभानां तु पंचाशत विज्ञेया पंचसंयुता।
महावहिता एवैत एवं सद्विशतद्वयं॥ १०॥
एव दशसहस्राणि शतानां तु चतुष्टयम्।
ऋचां द्व्यधिकमाख्यातमृषिभिस्तत्त्वदर्शिभिः॥ ११॥

श्रीकृष्णार्पणमस्तु।

फणिभट्टस्य पौत्रेण बालंभट्टस्य सूनुना।
विदुषा रामभट्टेन छन्दोऽनुक्रमणी . .॥

इति श्रीगह्वरोपनामकबालसरस्वतीभट्टात्मजरामभट्टकृता सर्वानुक्रमणीविवरणं समाप्तम्॥

Note at the end regarding the original: "Transcribed from the original in the Sanskrit College, Calcutta, No. 23."

On a fly-leaf at the beginning: श्रीश्रीदुर्गाशरणम्। विज्ञप्तिः। अत्र प्रतिलिपिग्रन्थे येषामक्षराणामधः ( ) एवं चिह्नमस्ति तेषु कानिचिदादर्शपुस्तकाक्षराणामस्पष्टतया अर्थबोधाभावादविकलमङ्कितानि। तत्र च यथामति अक्षराणि सम्भाव्य उपरि लिखितानि। कुत्रचिच्च आदर्शाक्षराणां नाशादुद्धर्तुमसमर्थतया अक्षरयोर्मध्ये लेखनयोग्यस्थानमेव रक्षितमिति। १८९२ शकाब्दीयसौरभद्रस्य पंचदशदिवसे। प्रतिलिपिकारकस्य श्रीपंचाननभट्टाचार्यशर्म्मणः सांख्यव्याकरणतीर्थस्य। सर्वानुक्रमवृत्तिः। रामभट्टविरचिता॥

1058. 22. D. 90.

THE SARVĀNUKRAMAṆĪVṚTTI (VEDĀRTHADĪPIKĀ) OF ṢAḌGURUS'IṢYA

सर्वानुक्रमणीवृत्तिः (वेदार्थदीपिका)—षड्गुरुशिष्यकृता

Palm-leaf. 183 folia (marked 1—192, foll. 1—4, 63, 143, 165, 166 and 192 missing). 13″ × 1½″. 6—8 lines in a page. Grantha script. Old. Worm-eaten and damaged. Good small writing. Inked. Incomplete.

Begins abruptly in the 6th line in p. 57 of Macdonell's edition, (1886): द्वंद्वगर्भषष्ठीसमासः। सूक्तानांभि प्रतीकादिशसः।

Ends in Sūkta 10. 185:

. . . . गः। तृतीया तृष्टुप् तृतीया तृष्टुबि . . . . ॥

Supplies variants to Macdonell's edition.

1059. 22. G. 39.

Palm-leaf. 80 folia. 17½″ × 1$\frac{3}{10}$″. 9 lines in a page. Telugu script. Old. Slightly worm-eaten. Good small writing. Partly inked.

Almost complete, a small portion missing at the end.

Begins: अविघ्नमस्तु ॥ श्रीगुरुभ्यो नमः ॥ श्रीसांबाय नमः ॥ अथ ऋग्वेदाम्नाये शाकलके सूक्तप्रतीकऋक्संख्यऋषिदैवतछंदांस्यनुक्रमिष्यामो यथोपदेशं । अथेति मंगले प्रस्तावे वा । ऋगंशबाहुल्याहग्वेदः । तत्र आम्नाये सम्यगभ्यासयुक्ते खिलरहिते शाकल्के ॥

Ends: यथा च गृह्यंते । मध्यमियान् मध्यमियात् । नमः शौनकाय नमः शौनकायेति । यथा चा . . . . . . ह्म भवति ब्रह्म भवति । एते च ब्राह्मणे दृष्टवान् कुर्वंतीति । तत्र हि क्षिप्रं हैवैनं स्तृणुते स्तृणुत इति दृश्यंते । ब्राह्मणारण्यकसूत्रगृह्यचतुर्थारण्यकेषु तु प्रत्यध्यायसमाप्तावपि द्विर्वचनं दृष्टं । वागुदिता भवति । भवतीत्यादि ।

अथ ऋग्वेदाम्नाय इत्यादि तृतीया त्रिष्टुबंतक ।
मिदं शास्त्रमधीयानः प्रणवार्थतामियात् ॥
ऋषिच्छंदोदैवतादिविज्ञानं फलमुच्यते ।
ऋषिनामर्षगोत्रज्ञ ऋषेः संस्थानतामियात् ॥
एकैकस्य ऋषेर्ज्ञानात्सहस्राद्वा स्थितिर्भवेत् ।
छंदसां चैव सालोक्यं छंदोज्ञानादवाप्नुयात् ॥

. . . .

यां यां विजानाति नरो देवतामिति निर्णयः ॥

किं च—

ऋष्यादिविज्ञानफलमनुभूय सुपूजितः ।
स्वाध्यायस्य फलं पश्चाच्छ्रुत्यादत्तं प्रपद्यते ॥
ज्ञाति . . . . ।

गुरुभ्यो नमः ॥

. कुरोधिवत्सरे मासे कार्तिके कृष्णपक्षके ।
दशम्यां शनिवारे च भाष्यं षड्गुरुसंज्ञकं ॥

A fly-leaf at the beginning contains an extract from the 2nd Kāṇḍa of the Taittirīyasaṃhitā.

The text has been published along with extracts from the Vedārthadīpikā, by A. A. Macdonell in Anecdota Oxoniensia, Oxford, 1886.

1060. 19. M. 40.

THE SALAKṢAṆAPARIBHĀṢĀ—
ANONYMOUS

सलक्षणपरिभाषा—अज्ञातकर्तृका

Palm-leaf. 9 folia. 16″ × 1″. 7 lines in a page. Grantha script. Fairly old. Slightly worm-eaten. Bad small writing. Inked.

A work pertaining to the Sāmaveda. Author not mentioned.

Complete.

Begins: शुभमस्तु । कतया . इ द्वितीये कवर्गसमाप्तेः पूर्यमातीताम् । का गृणानो हा द्वितीयान्तम् । आद्ये साम्नि कि समाये तृतीयान्तं । अग्निवृत्राद्वितीये कीतां चतुर्थान्तं । तं वोदस्म पञ्चमे । कु ओ इ मन्द्रान्तं । कूहा इषों हा इ । अति स्वार्य आद्ये साम्नि तृतीये ।

Ends: दवर्गशेषौ यकारः । तवर्गशेषो हकारः । साम्नां वक्तव्यमन्ते चलाक्षरन्तत्र । कवर्गः प्रथमः स्वराणां तदादीनां च पर्वणां ज्ञापकः इति प्रथमस्वरस्य पर्वणः यथा द्वितीये साम्नि । हरिः ओम् ॥ परिभाषे लक्षणं संपूर्ण ॥ शुभमस्तु ॥

The treatise is published in Grantha script, by Krishnaswami Srauti, Girvanavani Press, Tiruvadi. In this edition the

Lakṣaṇa is placed at the beginning while in all the MSS. noticed here except No. 1065 it is contained at the end.

1061. 19. M. 42.

Palm-leaf. 11 folia. $14\frac{1}{2}'' \times 1\frac{3}{10}''$. 5 or 6 lines in a page. Grantha script. Fairly old. Injured. Bad medium writing. Partly inked.

Complete.

Ends: परिभाषे लक्षणं संपूर्णं । श्रीगुरुपादारविन्दाभ्यान्नमः ॥ आंगीरसनामसंवत्सरफाल्गुणबहुळदशम्यां लिखितं । श्रीभारद्वाजकुलजलधिकौस्तुभश्रीकण्ठिमतप्रतिष्ठापनाचार्यचतुरधिकशतप्रबंधनिर्वाहकमहाव्रतयाजीश्रीमदीश्वरदीक्षितवंशजातेन वेंकटाचलदीक्षितपुत्रेण पर्वतवर्धनीगर्भसंभवेन विश्वनाथेन लिखितोयं ग्रंथः । परिभाषे समाप्तः ॥

On an extra leaf at the end: श्रीरामाय न्मः ।

आमहीयवसामादिश्रायन्तीयकृतानि च ।
ऊहसागमुत्तर्त्त शक्रुमः फल्गुनौकया ॥
सामजालजलाकीर्णं छन्दःकल्लोलसंकुल ।
तंत्रग्राहान्वितं वंदे सामवेदमहार्णवं ॥
सप्ताकारविभक्तिरम्यतनुमान् सप्तस्वरद्वीपवान्
नानारूपमखाख्यरत्ननिलयो देवर्ष्यनेकाश्रयः ।
कल्पेन्दूदयवर्धमानविभवच्छन्दोनदीपूरित-
स्तोभोत्तुंगतरंगवानवतु वस्सामागमांभोनिधेः ॥
करारविन्देन पदारविन्दं मुखारविन्दे विनिवेशयंतं ।
वटस्य पत्रस्य पुटे शयानं बलं मुकुंदं म . सा . रामि ॥

1062. 25. D. 17.

Palm-leaf. 8 folia. $16\frac{1}{2}'' \times 1\frac{3}{10}''$. 6 or 7 lines in a page. Grantha script. Wooden board at either end. Old. Worm-eaten and injured. Fairly well written in a small hand. Inked.

Complete.

Begins: . . न्धावानाञ्छन्दोगानां सप्तस्वरपरिज्ञानार्थं कवर्गादिपरिभाषा उच्यते । कतया इ का प्र . . . . हा । कि । समाये । की तां । कु . . . हा इषों हा इ । के आता इष्ठ । . . . . कै । । समिद्ध श्शुक्रया । को उपा हो इ । कौ । नाके सुपार्णमुपयात पातंतां ॥

Ends: रेभशेषो इकारः । गवर्गशेषो यकारः । हकारश्चतुर्थशेषाः । साम्नो वक्तव्यः । राक्षरं तत्र कवर्ग प्रथमस्वराणां तदादीनां च पर्वणां ज्ञापकः ॥

Folia 6: परिभाषाछलाक्षरम् समाप्तम् । अस्मत्गुरुभ्यो नमः । श्रीमद्वेदान्तरामानुजमहादेशिकाय न्मः । हरिः ओं शुभमस्तु ॥

1063. 25. D. 35.

Palm-leaf. 8 folia (153 sq.). $16\frac{2}{10}'' \times \frac{9}{10}''$. 4 or 5 lines in a page. Grantha script. Wooden board at either end. Old. Fairly well written in a medium hand. Inked.

Incomplete, the end missing.

1064. 26. G. 33.

Palm-leaf. 17 folia. (3 sq.). $14 \times 1''$. 6—8 lines in a page. Grantha script. Old. Worm-eaten and injured. Bad medium writing. Inked.

Complete.

The reverse of fol. 2 and the obverse of fol. 3 are left blank. 2 extra leaves at the beginning contain the Pravarakhaṇḍa.

1065. 34. G. 4.

Palm-leaf. 10 folia (1—10). $15\frac{1}{2}'' \times 1\frac{8}{10}''$. 10 or 11 lines in a page. Grantha script. Old. Damaged. Fairly well written in a medium hand. Inked.

Complete.

A note in Tamil on a fly-leaf at the beginning calls the work Chalākṣaraparibhāṣā.

1066. 8. F. 82.

THE SĀMATANTRA

सामतन्त्रम्

Paper. 23 folia. $6\frac{3}{4}'' \times 3\frac{3}{4}''$. 6—10 lines in a page. Grantha script. Old. In a good condition. Cursive medium writing.

A grammar of the Sāmaveda in 13 Prapāṭhakas.

Complete.

Begins: सामतंत्रसूत्रमारभ्यते। ओं। स्वरोऽनंत्यः। नीचांतानाम्। उपांत्यम्। उपांत्ये। त्रिषु। आदिः। उपांत्यं च। द्वितीयम्। अंतश्च। उपांत्ये। प्रथमः दशकः। आद्ये। अंत्ये। मध्यमम्। विपरितस्वराणाम्। जारा। माऽहं। शग्ध्यू। उता। पारिघु। दि। द्वितीयदशकः। पिबा। दधिविदपूर्वा। द्वितीयपूर्वा। रापरा च। सूष्वा। ईयाङ्। अंत्ये। शत। तिपौगु। तृतीयो दशकः। पत। वाव। देदि वुम। गुमंधा। क्रुष्टांतानाम् रूहूत। स्वारात नु। प्रथमम्। ग्रुता। दशकः॥

Ends: घश्चनाद्धविर्वे। ज्यादिर्दिशां व्रतात्। बृसारथिनिहा उपायम्। षस्तमसि मासुदौ। आंधायां वि। शंनायामत्रुणि। यण्वोत्तरयोरवाचि। षुवृण्वतायाः। वार्षाहर तृतीये। सर्वंमु चतुर्थम् स्वारे विकर्णे। जेः। द्यौराविजन्। इष्टापरे। पूरांतिलोपश्च। योबिभ्यां हवयोः। क्सिबाहवोः। ग्राम इह विपरीतं विश्वो रोहतु। दशकः। इति सामतंत्रे त्रयोदशः प्रपाठकस्समाप्तम्। महीशूरपुर्याम् समाप्तम्॥

On an extra folio at the end:

स्वरो ऽनंत्यो ऽथ प्रत्नाया ऽहं हो उल्बि तथैव च।
तत्त्रिमात्रोमुणोयुश्च द्विदुदीर्घं व्रदांत्यन्॥
अऽंसाशौतावुदात्ताश्चाक्षरतंत्रमतः परम्।
ग्रंथनां नामधेयो ऽपि कृतकर्त्तुश्च विस्तृतः॥

On the cover:

न च शाखाविशेषस्थं कार्यं वाच्यमिहाखिलं।
यस्माद्व्यवस्था शेषस्य वेद्या कतिपयोक्तितः॥

न खलु शाखाविशेषव्यवस्थितानि छान्दसकार्याणि सर्वाणि वक्तव्यानीत्यस्ति नियमः। अपि तु बोधयितव्यानीत्यत्र तत्र कतिपयेषूपदिष्टेष्ववशिष्टानामपि तन्मुखेन व्यवस्था शक्यतेवगंतुं। तथाहि—

संहिता तत्पदाध्याय क्रमाध्याय इति त्रिधा।
प्रसिद्धोस्य समाम्नायो विषयो वक्ष्यते ततः॥

व्यवस्थितेषु कार्येषु तद्वर्तिष्विह केषुचित्कार्यांतराणां तन्मूला व्यवस्था सुगमा भवेत्। यद्यपि आत्रेयोपक्रमात्पदक्लृप्तेः पूर्वमस्मत्संहितैकरूपसमाम्नाता तथापि अर्थसंप्रत्ययाद्यर्थमात्रेयेण यदा पदाध्यायः प्रवर्तितः असंदेहार्थं क्रमाध्यायश्च तदाप्रभृति स्वरूपेण पदात्मना क्रमात्मना चेति त्रेधा समाम्नायते। स खलु त्रिविध समाम्नायः अस्य शास्त्रस्य विषयेति शास्त्रांते दर्शयिष्यति पदक्रमविशेषज्ञ इति। तत्रानेन लक्षणेन समाम्नायसिद्धपदरूपे संहितारूपे च सुविज्ञाते व्युत्पत्तिः गम्म्यार्थानुरूपप्रकृतिप्रकृतिप्रत्ययविकृतिविभागो रूप-

विशेषानुगणकार्ययोश्च शिक्षाव्याकरणोपदिष्टस्सुगमः संपद्यते। तथा चेदं लक्षणं संहितातत्पदरूपनिर्णयमुखेन इहानुक्तानामपि कार्याणां व्यवस्थां बोधयतीति शाखाविशेषात्मकलक्ष्याणां शिक्षाव्याकरणात्मकलक्षणानां च संघटनार्थमारंभणीयमिति सिद्धं ।

तस्मात्तत्तत्समाम्नाने प्रातिशाख्याविरोधतः ।
कार्यं सर्वं व्यवस्थाप्यं शिक्षांव्याकरणोदितं ॥

1067. 33. E. 12.

Palm-leaf. 10 folia (6 sq.). $13\frac{8}{10}'' \times 1\frac{1}{4}''$. 8 lines in a page. Grantha script. Recent. In good condition. Good medium writing. Inked.

The work has at the end here a supplement named Akṣaratantra which begins: अथ सामतन्त्रे अक्षरतन्त्रप्रारम्भः । अनृगाद्यक्षरम् । हौ हो ओ हो इ भ्यो हो इ । वाचि । ओ हो हो यौ । औ हो ओ हा यौ । हा यि नि । हो । वा । उ हु वा । इ ये । प्रथमो दशकः ॥ इ या । होः । इ ह । य । इ । दंडावति । यहेषु । यमि । अ । यौ । यायं । धामधा । आदित्यव्रते किं च । ननि । द्वितीयो दशकः ॥ वर्चसि च । हा त्वंच तापरे । डण्योष्ठे ऽस्थि । मेह सि च । दंत्यादेरूतायाम् । आर्चिकं हसि । खडस्पर्शपरे । गपरे । दंत्यपरे । नाकद्वंद्वे चक्षुषि । दशकः । ३ ॥

Ends: घ्वरत्सि बापूष्णद्वर्याः । वारा । आयवचु । ओ । ता इव सूमागा । नाइमृडा । होता तवद । त्रयोदश दशकः । होहवे । हुवेसंचाभ्यः ॥ इति सामतंत्रे अक्षरतंत्रस्य द्वितीयः प्रपाठकः ॥ समाप्तमिदं सामतंत्रव्याकरणमक्षरतंत्रं च । हरिः ओम् । शुभम् ।

भग्नपृष्ठकटिग्रीवा० ॥

कुंभेश्वराय नमः । हरिः ओम् ॥

1068. 22. M. 15.

THE SĀMATANTRABHĀṢYA—
ANONYMOUS

सामतन्त्रभाष्यम्—अज्ञातकर्तृकम्

Palm-leaf. 18 folia. $15\frac{6}{10}'' \times 1\frac{1}{4}''$. 7 or 8 lines in a page. Grantha script. Old. Slightly worm-eaten. Fairly well written in a medium hand. Uninked.

Commentator not mentioned.

Incomplete; breaks off in Das'aka 9 of Prapāṭhaka 2. Author not mentioned.

Begins: सामतंत्रं ।

ऋग्विहीनं . . न्नगान . . . शं स्तोभमृचा सह ।
आविर्गानं स्तोभहीनं एवं गानत्रयं विदुः ॥

